# ॥ समर्थ रामदासांचा दासबोध दशक ० ॥

॥ श्री राम समर्थ ॥
श्री ग्रन्थराज दासबोध
॥ नमन ॥
गणेशः शारदा चैव सद्गुरुः सज्जनस्तथा ।
आराध्यदैवतं गुह्यं सर्वं मे रघुनन्दनः ॥ १॥
गणेश शारदा सद्गुरु। संत सज्जन कुळेश्वरु ।
सर्वहि माझा रघुवीरु। सद्गुरुरूपें ॥ २॥
माझें आराध्यदैवत। परम गुह्य गुह्यातीत ।
गुह्यपणाची मात। न चले जेथें ॥ ३॥
यो जातो मरुदंशजा खितितले संबोधयन् सज्जनान् ।
ग्रन्थं यो रचयन् सुपुण्यजनकं श्रीदासबोधाभिधम् ।
यः कीर्त्या पठनेन सर्वविदुषां स्वांतापहारिः सदा ।
सोऽयं मुक्तिकरः क्षितौ विजयते श्रीरामदासो गुरुः ॥ ४॥
मला वाटतें अंतरिं त्वां वसावें ।
तुझ्या दासबोधासि त्वां बोधवावें ।
अपत्यापरी पाववी प्रेमग्रासा ।
महाराजया सद्गुरु रामदासा ॥ ५॥
ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिम् ।
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतम् ।
भाव्वातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ ६॥
गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः ।
गुरुरेकं परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ ७॥
अनेन प्रीयतां देवो भगवाञ्जानकीपतिः ।
श्रीरामचन्द्रः पूर्वेषामस्माकं कुलदैवतम् ॥ ८॥
॥ श्रोता वक्ता श्रीराम समर्थ ॥
॥ जय जय रघुवीर समर्थ ॥

---

भगवान् श्रीमत् प. पू. श्रीधरस्वामिविरचित

॥ श्रीमद्दासबोधतत्त्वस्तवः ॥
‘दासस्त्वं भव रामस्य भवपारं स नेष्यति ’ ।
भवसेतुरिवाभाति दासबोधः प्रबोधयन् ॥ १॥
‘सर्वं हि पूरयत्येष श्रीरामो दासवांछितम् ’ ।
चिन्तामणिरिवाभाति दासबोधः प्रबोधयन् ॥ २॥
‘सर्वंप्रकारं दास्यं रामदास्येन नश्यति ’ ।
स्वातंत्रभाः प्रभातीत्थं दासबोधः प्रबोधयन् ॥ ३॥
‘पापं तापं च दैन्यं च रामदास्येन नश्यति ’ ।
इत्येवं बोधयन् भाति दासबोधः प्रबोधयन् ॥ ४॥
‘प्रपंचः परमार्थश्च रामदास्येन सिध्यति ’ ।
देहलीदीपवद्भाति दासबोधः प्रबोधयन् ॥ ५॥
‘वासनाजालनिर्मोकः रामदास्येन संभवेत् ’ ।
भवाब्धिनौरिवाभाति दासबोधः प्रबोधयन् ॥ ६॥
‘स्वाराज्यं च स्वराज्यं च रामदास्येन लभ्यते ’ ।
भातीत्थं बोधयन् नित्यं दासबोधः सुरद्रुमः ॥ ७॥
‘श्रीसमर्थसमस्त्वंस्या रामदास्येन पावनः ’ ।
स्पर्शोपल इवाभाति दासबोधः प्रबोधयन् ॥ ८॥
‘तवात्मा ब्रह्मरामोऽयं सा त्वमेव त्वमेव सः ’ ।
महावाक्यमिवाभाति दासबोधः प्रबोधयन् ॥ ९॥
‘दासोऽपि रामदास्येन रामस्त्वं त्वमृतो भवेः ’ ।
इति प्रबोधयन् भाति दासबोधः प्रबोधयन् ॥ १०॥
दासबोधश्चिदादित्यो यत्र कुत्रापि वा स्थितः ।
अज्ञानतिमिरं शीघ्रं नाशयन् काशतेऽनिशम् ॥ ११॥

॥ इति श्रीमद्दासबोधतत्त्वस्तवः ॥

श्रीधरस्वामी
बुधवार फाल्गुन शु. पौर्निमा शके १८७९
लोणवळें, दि. ५ मार्च १९५८

---

## अनुक्रमणिका

॥ श्रीरामसमर्थ ॥

नमस्ते दासबोधाय त्रिपथैक्यस्वरूपिणे ।
यस्य चिंतनमात्रेण कल्याणं च भवेत्सदा ॥
सर्वेऽपि सुखिनः सन्तु। सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु। मा कश्चित् दुःखमाप्नुयात् ॥

॥ जय जय रघुवीर समर्थ ॥

॥ श्रीरामसमर्थ ॥

॥ श्रीमत् दासबोध ॥

Proofread by Vishwas Bhide and Sunder Hattangadi.

Please send corrections to sanskrit@cheerful.com
Last updated May 16, 2009
http://sanskritdocuments.org